द्रव्यभेदे जीर्णतासाधनद्रव्यभेदा जीर्णमञ्जर्य्यामुक्ता यथा "नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं जम्बीरोत्थरसो हते समुचितः सर्पिस्तु मोचाफले । गोधूमेषु च कर्कटी हिततमा मांसात्यये काञ्जिकं नारङ्गे गुड़भक्षणञ्च कथितं पिण्डारके कोद्रवः । पिष्टान्ने सलिलं पियालफलजे पथ्या सिता माषजे खण्डं क्षीरभवे तु तक्रमुदितं कोष्णाम्बु कोलम्बजे । मत्स्ये चूतफलं त्वजीर्णशमनं मध्वम्बुपानात्यये तैलं पौष्करजे कटूप्रशमनं शेषांस्तु बुद्ध्या जयेत् । पनसे कदलं कदले च हतं घृतपाकविधावपि जम्बुरसः । तदुपद्रवशान्तिकरं लवणं लवणेषु च तण्डुलवारि वरम् । नारिकेलफलतालवीजयोः पाचनं य इह तण्डुलं विदुः । ते वदन्ति मुनयोऽथ तण्डुलान् क्षीरवारि परिपाचयत्यपि । दाड़िमाम्लकतालतिन्दुकीवीजपूरलवलीफलान्यपि । बाकुलेन च फलेन पाचयेत् पाकमेति बकुलं स्वमूलतः । मधूकमालूरन्टपादनानां पक्वप्रखर्ज्जूरकपित्थकानाम् । पाकाय पेयं पिचुमर्दवीजं हतेऽपि तक्रं प्रवदन्ति पथ्यम् । गोधूममाषहरिमन्थसतीनमुद्गपाको भवेदिति च मातुलपत्रकेण । खर्ज्जूरिका विसकशेरुसितास्तु शस्तं शृङ्गाटके मधुफलेष्वपि भद्रमुस्तम् । पिशितपनसयोः स्यादाम्रवीजेन पाकः क्षशरमहिषयोषित्क्षीरयोः सैन्धवेन । चिपिटपरिणतिः स्यात् पिप्पलीदीपकाभ्यामपहरति तुषाम्भो वैदलानामजीर्णम् । कर्पूरपूगीफलनागवल्लीकाश्मीरजातीफलजातिकोशम् । कस्तूरिकासिक्तकनारिकेलजलं पचत्याशु समुद्रफेनः । श्यामाकनीवारकुलत्थषष्टिनिष्पावकङ्गू दधिमस्तकस्तु । चिञ्चाकुलत्थौ तिलतैलयोगात् जटाह्वनादस्य निहन्त्यथाम्लम् । कशेरुशृङ्गाटकमृणालकन्दौ खर्ज्जूरखण्डा अपि नागरेण । पलाशभस्माम्बु तथार्द्रजो वा रसो निहन्यादूरसमिक्षुजातम् । अम्लेन केनाप्यथ व्योषकेन कोष्णाम्बुना वा हतमेति पाकम् । तिलादितैलान्यपि काञ्जिकेन सर्ज्जस्य मज्जा पनसामलक्यौ । किमत्र चित्रं बहुमांसमत्स्यभोजी सुखी स्यात् परिपीय शुक्तम् । दृत्यद्भुतं केवलवह्निपक्वमांसेन मत्स्यं परिपाकमेति । कपोतपारावतनीलकण्ठकपिञ्जलानां पिशितानि जग्ध्वा । कामस्य मूलं परिपेयमुष्णं सुखी भवेन्ना बहुशो न भूतम् । व्योषैः रसाला सुरभीयवस्तुमखण्डेन कोष्णेन विपाकमेति । शङ्खस्य चूर्णेन कृष्यारिगारीपयोदधिक्षीरमुपैति पाकम् । वटो वेसवाराज्जवङ्गेन फेनी शमं पर्पटः शिग्रुवीजेन याति । कणामूलतो लड्डुका पूपकादेर्विपाको भवेच्छष्कुलीमण्डयोश्च । श्वाविद्गोधागण्डकाश्चित्रतैलाद्र यावत् क्षारात् कोलुकूर्मादयोऽपि । जीर्य्यन्त्येवं पायसो मुद्गयूषात् साम्रुद्रादप्यारनालं सुखाय । तप्तं तप्तं हेम वा तारमग्नौ तोये क्षिप्तं सप्तकृत्वस्तदम्भः । पीत्वाजस्रं दीर्घकालोपपन्नमम्भो जीर्णं शीघ्रमेवं जहाति । पालङ्किकाकेसुककारवेल्ली वार्त्ताकुवंशाङ्कुरमूलकानाम् । उपोदकालाबुपटोलकानां सिद्धार्थको मेघवरस्य पक्ता । शुण्ठीसतीनस्य च नागरङ्गजम्बीरयोः कोद्रवको निहन्ता । जरामिरागैरिकचन्दनाख्यामस्थेति शीघ्रं बहुशो न भूनम् । पटोलवंशाङ्कुरकारवेल्लीफलान्यलाबूनि बहूनि जग्ध्वा । क्षारोदकं ब्रह्मतरोर्निपीय भोक्तुं पुनर्वाञ्छति तावदेव । विपच्यते शूरणको गुड़ेन तथालुकं तण्डुलतोयपानात् । जम्बीरनीरेण निशारसोनं सुस्तेन तूर्णं परिपाकमेति । चञ्चूकसिद्धार्थकवास्तुकानां गालविसारकथितेन पाकः । शाकानि सर्व्वाण्युपयान्ति पाकं क्षारेण सद्यस्तिलनालजेन । आम्रातकोदुम्बरपिप्पलीनां फलानि च प्लक्षवटादिकानाम् । स्युः, शमनं पर्य्युषितोदकेन पियालमज्जा च कदुष्णकेन । स्नेहाजीर्णं रोगिणां मुद्गचूर्णं ज्वालां सुस्तो हन्ति वैरेचकानाम् । माषो भूयान्निम्बमूलेन पाकसिद्धा सुस्त्र्यम्लतां चूर्णयोगात् । उष्णेन शीतं शिशिरेण चोष्णमम्लेन च क्षारगणो गुणाय । स्नेहेन तीक्ष्णं वमनातियोगे सिता हिता स्यादिति काशिराजः । ताम्बूलमध्यस्थितचूर्णकेन संदह्यते यस्य मुखं नरस्य । तैलेन वा केवलकाञ्जिकेन । सुखाय गण्डूषमसौ विदध्यात् । शीतोदकं नस्यजरोगहारि नारीपयश्चाञ्जनरुग्विनाशि । एलोदकं धूमगदे प्रशस्तं धात्रीप्रलेपोऽतिविरेचनेषु । छागस्य मांसं श्रमजेऽनुकूलं प्रवातसुप्तिः सुरतावसाने । क्षीरोषधा सैन्धवसाधितन्तु छागाण्डमुक्तं सुरतातिरेके । श्रवणपूरणजे तिलतैलतः श्रवणपूरणमेव सुखं विदुः । कवलजेषु गदेष्वथ कारयेत् कवलमार्द्रकजद्रवजं पुनः" ।

**जीर्णक** त्रि॰ जीर्णप्रकारः स्थूला॰ कन् । जीर्णप्रकारे ।

**जीर्णज्वर** पु॰ कर्म्मधा॰ । द्वादशाहाधिककालोत्पन्ने ज्वरे तल्लक्षणादिकं भावप्रका॰ उक्तं यथा ।